ओं सत्गुरुभ्यो नमः
ओं श्री गणपतये नमः
ओं श्री हरि श्री गणपतये नमः

<u>कनक धारा स्तोत्रं</u>

अंगं हरेः पुळकभूषणमाश्रयन्ती
भृंगांगनेव मुकुळाभरणं तमालं
अंगीकृताखिल विभूतिरपांगलील
मांगल्यऽदास्तु मम मंगळदेवतायाः (1)

मुग्द्धा मुहुर्विदधदती वदने मुरारेः
प्रेमत्रपाप्रणिहितानि गतागतानि
माल दृशोर्म्मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागरसंभवायः (2)

आमीलिताक्षमधिगम्य मुदा मुकुन्दम्
आनन्दकन्दमनिमेषमनंगतन्त्रं
आकेकरस्तितकनीनिकपक्ष्म नेत्रं
भूत्यै भवेन्मम भुजंगशयांगनायः (3)

बाह्वन्तरे मधुजितः श्रितकौस्तुभे या
हारवलीव हरिनीलमयी विभाति
कामप्रदा भगवतोऽअपि कटाक्षमाल
कल्याणमावहतु मे कमलालयायः (4)

कालांबुदाळिलळितोरसि कैटभारेः
धाराधरेः स्फूरति या तटिदंगनेव
मातुः समस्तजगतां महनीय मूर्त्तिः
भद्राणि मे दिशतु भार्ग्गवनन्दनायः (5)

प्राप्तं पदं प्रथमतः खलु यत्प्रभावा–
न्मांगल्यभाजि मधुमाथिनि मन्मथेन
मय्यापदेत्तदिह मन्थरमीक्षणार्त्थं

मन्दालसं च मकरालयकन्यकायः (6)

विश्वामरेन्द्रपदविभ्रमदानदक्षं
आनन्दहेतुरधिकं मुरविद्विषोऽपि
ईषन्निषीदतु मयिक्षणमीक्षणार्द्धं
इन्दीवरोदरसहोदरमिन्दिरायाः (7)

इष्टाविशिष्टमतयोऽपि यया दयार्द्र–
दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते,
दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां,
पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः (8)

दद्याद्दयानुपवनो द्रविणांबुधारां
अस्मिन्न किंचन विहंग शिशौ विषण्णे
दुष्क्कर्म्मघर्म्ममपनीय चिराय दूरं
नारायणप्रणयिनीनयनांबुवाहः (9)

गीर्द्देवतेति गरुडध्वजसुन्दरीति
शाकंभरीति शशि शेखर वल्लभेति
सृष्टिस्तितिप्रळयकेलिषु संस्तितायै
तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै (10)

श्रुत्यै नमोऽस्तु शुभकर्म्मफलप्रसूत्यै,
रत्यै नमोऽस्तु रमणीय गुणार्णवायै
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तम वल्लभायै (11)

नमोऽस्तु नाळीकनिभाननायै
नमोऽस्तु दुग्द्धोदधिजन्मभूम्यै
नमोऽस्तु सोमामृतसोदरायै
नमोऽस्तु नारायणवल्लभायै (12)

नमोऽस्तु हेमांबुजपीठिकायै
नमोऽस्तु भूमण्डलनायिकायै

नमोऽस्तु देवादि दयापरायायै
नमोऽस्तु शार्ङ्गायुधवल्लभायै (13)

नमोऽस्तु देव्यै भृगुनन्दनायै
नमोऽस्तु विष्णोरुरसि स्थितायै
नमोऽस्तु लक्ष्म्यै कमलालयायै
नमोऽस्तु दामोदरवल्लभायै (14)

नमोऽस्तु कान्त्यै कमलेक्षणायै
नमोऽस्तु भूत्यै भुवनप्रसूत्यै
नमोऽस्तु देवादिभिरर्च्चितायै
नमोऽस्तु नन्दात्मज वल्लभायै (15)

संपत्कराणि सकलेन्द्रियनन्दनानि
साम्राज्यदानविभवानि सरोरुहाक्षि!
त्वद्वन्दनानि दुरिताहरणोद्यतानि
मामेव मातरनिशं कलयन्तुमान्ये! (16)

यत्कटाक्षसमुपासनाविधिः
सेवकस्य सकलार्त्थसंपदः
संतनोति वचनांगमानसैः
त्वां मुरारिहृदयेश्वरीं भजे. (17)

सरसिजनिलये सरोजहस्ते!
धवळतमांशुकगन्धमाल्यशोभे!
भगवतिहरिवल्लभे मनोज्ञे
त्रिभुवनभूतिकरि! प्रसीदमह्यं. (18)

दिग्घस्तिभिः कनककुंभमुखावसृष्ट–
स्वर्वाहिनीविमलचारुजलप्लुतांगीं
प्रातर्न्नमामि जगतां जननीमशेष
लोकाधिनाथगृहिणीममृताब्धिपुत्रीं (19)

कमले कमलाक्षवल्लभे! त्वं

करूणापूरतरंगितैरपांगैः
अवलोकय ममकिञ्चनानां
प्रथमं पात्रमकृत्रिमं दयायाः (20)

स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं
त्रयीमयीं त्रिभुवनमातरं रमां
गुणाधिका गुरुतरभाग्यभाजिनो
भवन्ति ते भुवि बुधभाविताशयाः (21)